श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ अधिकारपरिग्रहपद्धतिः षष्ठी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ अधिकारपरिग्रहपद्धतिः षष्ठी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

अधीष्टे पादुका सा मे यस्याः साकेतवासिभिः।
अन्वयव्यतिरेकाभ्याम् अन्वमीयत वैभवम् ॥ **6.1** ॥

मोचितस्थिरचरानयत्नतः कोसलाञ्जनपदानुपास्महे।
येषु कांश्चन बभूव वत्सरान् दैवतं दनुजवैरिपादुका ॥ **6.2** ॥

साम्राज्यसम्पदिव दासजनोचिता त्वं
    रामेण सत्यवचसा भरताय दत्ता।
स त्वां निवेश्य चरणावनि ! भद्रपीठे
    पृथ्वीं बुभोज बुभुजे च यशोविभूतिम् ॥ **6.3** ॥

भोगाननन्यमनसां मणिपादुके ! त्वं
    पुष्णासि हन्त भजतामनुषङ्गसिद्धान्।
तेनैव नूनमभवद्भरतस्य साधोः
    अप्रार्थितं तदिह राज्यमवर्जनीयम् ॥ **6.4** ॥

रामप्रयाणजनितं व्यपनीय शोकं
    रत्नासने स्थितवती मणिपादरक्षे !।
पृथ्वीं निजेन यशसा विहितोत्तरीयाम्
    एकातपत्रतिलकां भवती वितेने ॥ **6.5** ॥

रामाज्ञया परवती परिगृह्य राज्यं
    रत्नासनं रघुकुलोचितमाश्रयन्ती।
शुद्धां पदावनि ! पुनर्भवती वितेने
    स्वातन्त्र्यलेशकलुषां भरतस्य कीर्तिम्॥ **6.6** ॥

पौलस्त्यवीरवदनस्तबकावसानात्
    पुष्पाणि दण्डकवनेष्वपचेतुमिच्छोः।
रक्षाधुरं धृतवती मणिपादुके ! त्वं
    रामस्य मैथिलसुतासहिते प्रचारे॥ **6.7** ॥

पादावनि ! प्रचलचामरबृन्दमध्ये
    भद्रासनास्तरगता भवती विरेजे।
आकीर्णदिव्यसलिले कटके सुमेरोः
    अम्भोजिनीव कलहायितहंसयूथा॥ **6.8** ॥

मान्ये रघूद्वहपदे मणिपादुके ! त्वां
    विन्यस्य विग्रहवतीमिव राज्यलक्ष्मीम्।
आलोलमक्षवलयी भरतो जटावान्
    आलम्ब्य चामरमनन्यमनाः सिषेवे॥ **6.9** ॥

प्राप्ते दिवं दशरथे भरते विलक्षे
    पर्याकुलेषु भृशमुत्तरकोसलेषु।
त्वं चेदुपेक्षितवती क इवाभविष्यत्
    गोपायितुं गुहसखस्य विभोः पदं तत्॥ **6.10** ॥

भ्रातुर्यदम्ब ! विरहाद् भरते विषण्णे
    दाक्षिण्यमाश्रितवती मणिपादुके ! त्वम्।
आसीदशेषजगतां श्रवणामृतं तत्
    वाचालकाहळसहं बिरुदं तदा ते॥ **6.11** ॥

राज्यं तदा दशरथादनु रामतः प्राक्
बिभ्राणया चरणरक्षिणि ! वीतखेदम्।
तुल्याधिकारभजनेन बभूव धन्यो
वंशस्त्वयाऽम्ब ! मनुवंश महीपतीनाम्॥ **6.12** ॥

वर्षाणि तानि वृषळो न तपांसि तेपे
बालो न कश्चिदपि मृत्युवशं जगाम।
राज्ये तवाम्ब ! रघुपुङ्गवपादरक्षे !
नैवापरं प्रतिविधेयमभूत् प्रसक्तम्॥ **6.13** ॥

विश्वं त्वदाश्रितपदाम्बुजसम्भवायां
यस्यां प्रतिष्ठितमिदं मणिपादरक्षे !।
आसीदनन्यशरणा समये यथावत्
साऽपि त्वया वसुमती विहितप्रतिष्ठा॥ **6.14** ॥

प्रायेण रामविरहव्यथिता तदानीम्
उत्सङ्गमाश्रितवती तव राज्यलक्ष्मीः।
तामेव देवि ! ननु जीवयितुं जलार्द्राम्
अङ्गीचकार भवती भरतोपनीताम्॥ **6.15** ॥

वीरव्रतप्रणयिनि प्रथमे रघूणां
प्राप्ते चिराय भरते व्रतमासिधारम्।
त्यक्त्वा पदावनि ! तदा विविधान् विहारान्
एकासिकाव्रतमपूर्वमवर्तयस्त्वम्॥ **6.16** ॥

काकुत्स्थपादविरहप्रतिपन्नमौनां
निष्पन्दतामुपगतां मणिपादरक्षे !।
आश्वासयन्निव मुहुर्भरतस्तदानीं
शीतैरवीजयत चामरमारुतैस्त्वाम्॥ **6.17** ॥

यत्र क्वचिद्विहरतोऽपि पदारविन्दं
    रक्ष्यं मया रघुपतेरिति भावयन्त्या।
निश्शेषमेव सहसा मणिपादरक्षे !
    निष्कण्टकं जगदिदं विदधे भवत्या॥ **6.18** ॥

रामं त्वया विरहितं भरतं च तेन
    त्रातुं पदावनि ! तदा यदभूत् प्रतीतम्।
रामानुजस्य तव चाम्ब ! जगत् समस्तं
    जागर्ति तेन खलु जागरणव्रतेन॥ **6.19** ॥

अन्तःपुरे परिजनैः समयोपयातैः
    अभ्यर्चिता भवसि या विनयोपपन्नैः।
सा कोसलेश्वरपदावनि ! भूपतीनां
    सङ्घट्टनं मकुटपङ्क्तिभिरन्वभूस्त्वम्॥ **6.20** ॥

प्राप्याधिकारमुचितं भुवनस्य गुप्त्यै
    भद्रासनं भरतवन्दितमाश्रयन्त्या।
मध्येऽवतीर्णमिव माधवपादरक्षे !
    मातस्त्वयाऽपि मनुवंशमहीपतीनाम्॥ **6.21** ॥

राजासने रघुकुलोद्वहपादरक्षे !
    नीराजनं समभवत् समयोचितं ते।
श्लाघावशेन बहुशः परिघूर्णिताभिः
    सामन्तमौळिमणिमङ्गळदीपिकाभिः॥ **6.22** ॥

पृथ्वीपतीनां युगपत् किरीटाः
    प्रत्यर्थिनां प्राणितुमर्थिनां च।
प्रापुस्तदा राघवपादरक्षे !
    त्वदीयमास्थानिकपादपीठम्॥ **6.23** ॥

प्रणम्य रङ्गेश्वरपादरक्षे !
    दूरोपनीतैरुपदाविशेषैः।
सभाजयन्ति स्म तदा सभायाम्
    उच्चैस्तरामुत्तरकोसलास्त्वाम्॥ **6.24** ॥

अपावृतद्वारमयन्त्रिताश्वं
    रङ्गेशपादावनि ! पूर्वमासीत्।
त्वया यदृच्छासुखसुप्तपान्थं
    रामे वनस्थेऽपि पदं रघूणाम्॥ **6.25** ॥

अनन्यभक्तिर्मणिपादुके ! त्वाम्
    अभ्यर्चयन् दाशरथिर्द्वितीयः।
विकल्प्यमानः प्रथमेन कीर्त्या
    वन्द्यः स्वयं व्योमसदां बभूव॥ **6.26** ॥

अरण्ययोग्यं पदमस्पृशन्ती
    रामस्य राजार्हपदे निविष्टा।
आस्थाननित्यासिकया निरास्थः
    स्वर्गौकसां स्वैरगतेर्विघातम्॥ **6.27** ॥

राजासने चेद्भवती निषण्णा
    रङ्गेशपादावनि ! तन्न चित्रम्।
यत्राधिरूढाः क्रमशः पुरा त्वाम्
    उत्तंसयन्ते रघुसार्वभौमाः॥ **6.28** ॥

भद्रासनं चेत् परिवृत्तमासीत्
    देवि ! क्षणं दक्षिणतोमुखं ते।
कथं भवेत् काञ्चनपादरक्षे !
    रामस्य रक्षोमृगयाविहारः॥ **6.29** ॥

यावत् त्वया राघवपादरक्षे !
    जिगीषिता राक्षसराजधानी।
मालेव तावल्लुळिता मदान्धैः
    उद्यानशाखामृगयूथपैस्ते॥ **6.30** ॥

महीक्षितां राघवपादरक्षे !
    भद्रासनस्थां भवतीं स्पृशन्तः।
पूर्वं तथात्वे नियतेऽपि भूयः
    कल्याणतामानशिरे किरीटाः॥ **6.31** ॥

अनिच्छतः पाण्डरमातपत्रं
    पित्रा वितीर्णं मणिपादरक्षे !।
आसीत् त्वदर्थं विधृतेन तेन
    छाया समग्रा भरतस्य मौळौ॥ **6.32** ॥

पादुके ! रघुपतौ यदृच्छया
    प्रस्थिते वनविहारकौतुकात्।
आधिराज्यमधिगम्य ते युवाम्
    अक्षतं वसुमतीमरक्षतम्॥ **6.33** ॥

रघुवीरपदानुषङ्गमात्रात्
    परिबर्हेषु निवेशिता यदि त्वम्।
अधिकारदिने कथं पुनस्ते
    परिवारास्तव पादुके ! बभूवुः॥ **6.34** ॥

पुरुषार्थचतुष्टयार्थिनीनां
    परिषत् ते महिता वसिष्ठमुख्यैः।
क्रयविक्रयपट्टणं प्रजानाम्
    अभवत् काञ्चनपादुके ! तदानीम्॥ **6.35** ॥

मनुजत्वतिरोहितेन शक्ये
    वपुषैकेन विरोधिनां निरासे।
अभजद्भरतादिभेदमीशः
    स्वयमाराधयितुं पदावनि ! त्वाम् ॥ **6.36** ॥

मगधाङ्गकळिङ्गवङ्गमुख्यान्
    विमतान् रन्ध्रगवेषिणः ससैन्यान्।
रघुपुङ्गवपादुके ! विजिग्ये
    भरतः शासनमुद्वहन् भवत्याः ॥ **6.37** ॥

अनितरवहनीयं मन्त्रिमुख्यैर्यदा तत्
    त्वयि विनिहितमासीत् सूर्यवंशाधिराज्यम्।
रघुपतिपदरक्षे ! रत्नपीठे तदानीं
    श्रियमिव ददृशुस्त्वां सादरं लोकपालाः ॥ **6.38** ॥

परिहृतदण्डकाध्वगमनं पदरक्षिणि ! तत्
    परिणतविश्वसम्पदुदयं युवयोर्द्वितयम्।
रघुपतिरत्नपीठमधिरुह्य तदा विदधे
    व्यपगतवैरिभूपनिलयं वसुधावलयम् ॥ **6.39** ॥

प्राप्तोदया तदानीं किमपि तमस्तन्निराकरोद्भवती।
तनुरिव मनुकुलजनुषां प्रसवित्री रत्नपादुके ! सवितुः ॥ **6.40** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे अधिकारपरिग्रहपद्धतिः षष्ठी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥